त्तमसां साम्यावस्था सा अविकृतिः । प्रकृतिरेवेत्यर्थः कस्मादित्यत उक्तम् मूलेति मूलञ्चासौ प्रकृतिश्चेति मूलप्रकृतिः विश्वस्य कार्य्यसंघातस्य सा मूलं नत्वस्या मूलान्तरमस्तीति भावः । कतमाः पुनः प्रकृतिविकृतयः कियत्यश्चेत्यत उक्तम् महदाद्याः प्रकृतिविकृतयः सप्तेति प्रकृतयश्च ता विकृतयश्च ता इति । तथा हि महत्तत्त्वमहङ्कारस्य प्रकृतिर्विकृतिश्च मूलप्रकृतेः । एवमहङ्कारतत्त्वं तन्मात्राणामिन्द्रियाणाञ्च प्रकृतिर्विकृतयश्च महतः । एवं पञ्चतन्मात्राणि भूतानामाकाशादीनां प्रकृतयो विकृतयश्चाहङ्कारस्य । अत्र विकृतिरेव कियती चेत्यत उक्तं षोड़शकस्तु विकार इति । षोडशसंख्यापरिमितो गणः षोडशकः तुशब्दोऽवधारणे भिन्नक्रमश्च पञ्चमहाभूतान्येकादशेन्द्रियाणि चेति षोड़शको गणो विकार एव "न प्रकृतिरिति । यद्यपि च पृथिव्यादीनामपि गोघटवृक्षादयो विकाराः एवं तद्विकारभेदानां दध्यङ्कुरादयस्तथापि गवादयो बीजादयो वा न पृथिव्यादिभ्यस्तत्त्वान्तरं तत्त्वान्तरोपादानत्वञ्च प्रकृतित्वमिहाभिप्रेतमिति न दोषः सर्व्वेषां गोघटादीनां स्थूलतेन्द्रियग्राह्यता च समेति न तत्त्वान्तरत्वम् । अनुभयरूपमुक्तं तदाह न प्रकृतिर्न विकृतिः पुरुषः" इति त०कौ० । शब्दस्पर्शविहीनं तद्रूपादिभिरसंयुतम् । त्रिगुणं तत् जगद्योनिः" स्मृतिः । तदनुमापकाः कार्य्यभेदाः तद्धर्म्माश्च सां०सू० भाष्याद्युक्ता यथा "ततः प्रकृतेः" सां० सू० "ततो महत्तत्त्वात् कार्य्यात् कारणतया प्रकृतेरनुमानेन बोध इत्यर्थः । अन्तःकरणसामान्यस्यापि कार्य्यत्वं तावदेकदा पञ्चेन्द्रियज्ञानानुत्पत्त्या मध्यमपरिमाणतया देहादिवदेव सिद्धं श्रुतिस्मृतिप्रमाणाच्च । तस्य च प्रकृतिकार्य्यत्वेऽयं प्रयोगः । सुखदुःखमोहधर्म्मिणी बुद्धिः सुखदुःखमोहधर्म्मकद्रव्यजन्या कार्य्यत्वे सति सुखदुःखमोहात्मकत्वात् कान्तादिवदिति कारणगुणानुसारेणैव कार्य्यगुणौचित्यं चात्रानुकूलस्तर्कः श्रुतिस्मृतयोऽपीतिमन्तव्यम् भा० "हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्" सू० कारणानुमापकत्वाल्लयगमनाद्वाऽत्र लिङ्गं कार्य्यजातम् न तु महत्तत्त्वमात्रमत्र विवक्षितं हेतुमत्त्वादीनामखिलकार्य्यसाधारण्यात् । "हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् । सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्" इति कारिकायामप्यत एव व्यक्ताख्यं सर्व्वं कार्य्यमेव लिङ्गमित्युक्तम् । तथा च तल्लिङ्गं हेतुमत्त्वादिधर्म्मकमिति वाक्यार्थः । तत्र हेतुमत्त्वं कारणवत्त्वम् अनित्यत्वं विनाशिता प्रधानस्य या व्यापिता पूर्व्वोक्ता तद्वैपरीत्यमव्यापित्वम् । सक्रियत्वमध्यवसायादिरूपनियतकार्य्यकारित्वम् । प्रधानस्य तु सर्व्वक्रियासाधारण्येन कारणत्वान्न कार्य्यैकदेशमात्रकारित्वम् । न च क्रिया कर्म्मैव वक्तुं शक्यते प्रकृतिक्षोभात् सृष्टिश्रवणेन प्रकृतेरपि कर्म्मवत्तया सक्रियत्वापत्तेरिति । अनेकत्वं सर्गभेदेन भिन्नत्वम् । सर्गद्वयासाधारण्यमिति यावत् । न पुनः सजातीयानेकव्यक्तिकत्वम् प्रकृतावपि व्याप्तेः प्रकृतेरपि सत्त्वाद्यनेकरूपत्वात् "सत्त्वादीनामतद्धर्म्मत्वं तद्रूपत्वात्" इत्यागामिसूत्रादिति । आश्रितत्वं चावयवेष्विति" सां०प्र०भा० । एतद्विपरीतत्वमेव तद्धर्म्मत्वम् । २० प्रकृत्यंशदेवीपञ्चकरूपशक्तिभेदे "गणेशजननी दुर्गा१ राधा२ लक्ष्मीः३ सरस्वती४ । सावित्री५ च सृष्टिविधौ प्रकृतिः पञ्चमी स्मृता" । प्रकृतिशब्दनिरुक्तिर्यथा "प्रकृष्टवाचकः प्रश्च कृतिश्च सृष्टिवाचकः । सृष्टौ प्रकृष्टा या देवी प्रकृतिः सा प्रकीर्त्तिता । गुणे प्रकृष्टे सत्त्वे च प्रशब्दो वर्त्तते श्रुतौ । मध्यमे रजसि कृश्च तिशब्दस्तामसः स्मृतः । त्रिगुणात्मस्वरूपा या सर्व्वशक्तिसमन्विता । प्रधाना सृष्टिकरणे प्रकृतिस्तेन कथ्यते । प्रथमे वर्त्तते प्रश्च कृतिश्च सृष्टिवाचकः । सृष्टेराद्या च या देवी प्रकृतिः सा प्रकीर्त्तिता" । तस्या आविर्भूतिः स्वरूपञ्च यथा "योगेनात्मा सृष्टिविधौ द्विधारूपो बभूव सः । पुमांश्च दक्षिणार्द्धाङ्गात् वामाङ्गात् प्रकृतिः स्मृता । सा च ब्रह्मस्वरूपा च यथा नित्या सनातनी । यथात्मा च यथाशक्तिर्यथाग्नौ दाहिका स्मृता । अत एव हि योगीन्द्रः स्त्रीपुंभेदं न मन्यते । सर्व्वं ब्रह्ममयं ब्रह्मन् ! शश्वत् पश्यति नारद ! । स्वेच्छामयं स्वेच्छया च श्रीकृष्णस्य सिसृक्षया । साविर्बभूव सहसा मूलप्रकृतिरीश्वरी । तथा ज्ञेया पञ्चविधा सृष्टिकर्म्मणि भेदतः । सर्व्वाः प्रकृतिसम्भूता उत्तमाधममध्यमाः । सत्त्वांशाश्चोत्तमा ज्ञेयाः सुशीलाश्च पतिव्रताः । मध्यमा राजसांशास्ताश्च भोग्याः प्रकीर्त्तिताः । सुखसम्भोगवश्याश्च स्वकार्य्ये तत्पराः सदा । अधमास्तामसांशा अजातकुलसम्भवाः । दुर्म्मुखाः कुलटा धूर्त्ताः स्वतन्त्राः कलहप्रियाः । पृथिव्यां कुलटा याश्च स्वर्गे चाप्सरसां गणाः । प्रकृतेस्तामसांशास्ताः पुंश्चल्यः परिकीर्त्तिताः । एवं निगदितं सर्व्वं प्रकृतेः परिकीर्त्तनम्" ।